# Shri Rajarajeshvari Kavacham

# શ્રીરાજરાજેશ્વરીકવચમ્

## Document Information

Text title : Rajarajeshvari Kavacham

File name : rAjarAjeshvarIkavacham.itx

Category : devii, devI, dashamahAvidyA, kavacha

Location : doc_devii

Proofread by : Megha Jogithaya

Description/comments : Gandharva Tantra chaturthaH paTalaH

Latest update : August 1, 2021

Send corrections to : sanskrit@cheerful.com

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

December 17, 2022

*sanskritdocuments.org*

# શ્રીરાજરાજેશ્વરીકવચમ્

અથ ચતુર્થઃ પટલઃ -
પાર્વતી ઉવાચ-
દેવદેવ મહાદેવ લોકાનાં હિતકારક ।
યત્ સૂચિતં પુરા નાથ કિમર્થં ન પ્રકાશિતમ્ ॥ ૧॥

રાજરાજેશ્વરીદેવ્યાસ્ત્રિપુરાયાઃ શુભાવહમ્ ।
કવચં યદિ મે પ્રીતઃ કથયસ્વ વૃષધ્વજ ॥ ૨॥

ઈશ્વર ઉવાચ-
લક્ષવારસહસ્રાણિ વારિતાસિ પુનઃ પુનઃ ।
સ્ત્રીસ્વભાવાન્મહાદેવિ ! પુનસ્ત્વં પરિપૃચ્છસિ ॥ ૩॥

અત્યન્તં દુર્લભં ગુહ્યં કવચં સર્વકામદમ્ ।
તથાપિ કથયામ્યદ્ય તવ પ્રીત્યા વરાનને ॥ ૪॥

ત્રૈલોક્યમોહનં નામ ત્રિષુ લોકેષુ દુર્લભમ્ ।
સર્વસૌભાગ્યજનનં ભોગમોક્ષફલપ્રદમ્ ॥ ૫॥

યત્ કૃત્વા દાનવાન્ વિષ્ણુર્નિજઘાન સુદારુણાન્ ।
લોકાન્ વિતનુતે બ્રહ્મા સંહર્તાઽહં યતઃ પ્રિયે ॥ ૬॥

ધનાધિપઃ કુબેરોઽપિ યતઃ સર્વે દિગીશ્વરાઃ ।
નૈતત્ પરતરં ગુહ્યં પ્રતિજાનીહિ પાર્વતિ ॥ ૭॥

વેદશાસ્ત્રપુરાણેષુ સારમેતદ્ વરાનને ।
પુત્રદારાદિસહિતં શિરો દેયં કથઞ્ચન ॥ ૮॥

ન દેયં કવચં ગુહ્યં પ્રાણૈઃ કણ્ઠગતૈરપિ ।
શૃણુ સર્વાઙ્ગસુભગે દિવ્યં કવચમુત્તમમ્ ॥ ૯॥

રાજરાજેશ્વરીદેવ્યાઃ કવચસ્ય ઋષિઃ શિવઃ ।

છન્દો વિરાડ્ દેવતા ચ મહાત્રિપુરસુન્દરી ॥ ૧૦॥

હંસઃ શક્તિઃ પરાબીજં રમાબીજં ચ કીલકમ્ ।
ધર્માર્થકામમોક્ષેષુ વિનિયોગઃ પ્રકીર્તિતઃ ॥ ૧૧॥

ત્રિપુરા ત્રિવિધા પાતુ મમ સર્વાર્થસિદ્ધયે ।
ઐં ક્લીં સૌઃ વદને બાલા પાતુ સર્વાર્થસિદ્ધિદા ॥ ૧૨॥

કણ્ઠં પાતુ મહાદેવી શ્રીમત્ત્રિપુરભૈરવી ।
હૃદયેઽવ્યાન્મહેશાની મહાત્રિપુરસુન્દરી ॥ ૧૩॥

રાજરાજેશ્વરી વિદ્યા ષોડશી યા મહોદયા ।
બ્રહ્મરન્ધ્રે સદા પાતુ કમલા પરમેશ્વરી ॥ ૧૪॥

ગિરિરાજસુતા દેવી પાતુ નિત્યં ચ શીર્ષકે ।
કામબીજં લલાટેઽવ્યાદ્ વાગ્બીજં કણ્ઠદેશકે ॥ ૧૫॥

સૌઃ પાતુ તથા પાર્શ્વે પ્રણવો બાહુમૂલકે ।
શમ્ભુપ્રિયા સદા પાતુ બાહુદક્ષિણસવ્યયોઃ ॥ ૧૬॥

વિષ્ણુપ્રિયા સદા પાતુ મણિબન્ધદ્વયે તથા ।
પાર્વતીશઃ કરે પાતુ નેત્રે નક્ષત્રવલ્લભઃ ॥ ૧૭॥

શ્રોત્રે રતિપ્રિયઃ પાતુ ઘ્રાણે શઙ્કઃ સદાઽવતુ ।
પૃષ્ઠદેશે સદા પાતુ પાર્વતી પરમેશ્વરી ॥ ૧૮॥

હ્સૌઃ શ્વાસે ચ નિઃશ્વાસે પાતાં પરમસિદ્ધિદૌ ।
કામઃ કામે સદા પાતુ પિનાકી લિઙ્ગગોચરે ॥ ૧૯॥

પૃથ્વી સર્વાંશકે પાતુ હૃલ્લેખા હૃદયેઽવતુ ।
સ્તનૌ ભૃગુપ્રિયા પાતુ કુક્ષૌ ચ સ પુરાન્તકઃ ॥ ૨૦॥

નેત્રે વજ્રધરઃ પાતુ માયા વૈ જઠરેઽવતુ ।
પદદ્વન્દ્વે ચ સૌઃ પાતુ ઐં જિહ્વાનિલયેઽવતુ ॥ ૨૧॥

ક્લીઙ્કારઃ સર્વદા પાતુ દન્તૌષ્ઠયોર્વરાનને ।
શીર્ષાદિપાદપર્યન્તં સર્વાઙ્ગં ભુવનેશ્વરી ॥ ૨૨॥

રક્ષાહીનં ચ યત્ સ્થાનં વર્જિતં કવચેન તુ ।
તત્ સર્વં પરમેશાનિ ! પાતુ નિત્યં હરિપ્રિયા ॥ ૨૩॥

આધારે વાગ્ભવઃ પાતુ કામરાજો હૃદિ પ્રિયે ।
શક્તિકૂટં તથા પાતુ ભ્રુવોર્મધ્યે ચ પાર્વતિ ॥ ૨૪॥

શીર્ષે કૂટત્રયં પાતુ લલાટે સર્વમન્ત્રકઃ ।
અષ્ટાવિંશતિવર્ણેયં મુખવૃત્તે સદાઽવતુ ॥ ૨૫॥

ષોડશીયં મહાવિદ્યા બ્રહ્મવિદ્યૈવ કેવલા ।
ભોગમોક્ષપ્રદા દેવી કેવલાત્મસ્વરૂપિણી ॥ ૨૬॥

કામેશ્વરી લલાટેઽવ્યાન્મુખેષુ ભગમાલિની ।
દક્ષનેત્રે સદા પાતુ નિત્યક્લિન્ના મહોદયા ॥ ૨૭॥

ભેરુણ્ડા વામનેત્રેઽવ્યાત્ કર્ણે વૈ વહ્નિવાસિની ।
મહાવિદ્યેશ્વરી પાતુ વામકર્ણપ્રદેશકે ॥ ૨૮॥

દક્ષનાસાપુટે પાતુ શિવદૂતી મહેશ્વરી ।
વામનાસાપુટે પાતુ ત્વરિતા સર્વસિદ્ધિદા ॥ ૨૯॥

દક્ષગણ્ડે સદા પાતુ નિત્યં માં કુલસુન્દરી ।
ત્રૈલોક્યવિમલા પાતુ વામગણ્ડપ્રદેશકે ॥ ૩૦॥

ઓષ્ઠે નીલપતાકાઽવ્યાદધરે વિજયાઽવતુ ।
ઊર્ધ્વદન્તે સદા પાતુ દેવી માં સર્વમઙ્ગલા ॥ ૩૧॥

અધોદન્તપ્રદેશેઽવ્યાન્નિત્યં જ્વાલાંશુમાલિની ।
વિચિત્રા સર્વદા પાતુ નિત્યં મૂર્દ્ધનિ પાર્વતિ ॥ ૩૨॥

આસાં પ્રધાનભૂતા યા મહાત્રિપુરસુન્દરી ।
ષોડશી સા સદા પાતુ મુખે વૈ પરમેશ્વરી ॥ ૩૩॥

પૃષ્ઠદેશે સદા પાન્તુ ગુરવસ્ત્રિવિધાશ્ચ તે ।
પાદયોઃ સર્વદા પાતુ ત્રિપુરા પરમેશ્વરી ॥ ૩૪॥

અનુદેશે સદા પાતુ દેવી માં ત્રિપુરેશ્વરી ।
ઊરુદ્વયે સદા પાતુ દેવી ત્રિપુરસુન્દરી ॥ ૩૫॥

ત્રિપુરવાસિની દેવી કટિદેશે સદાઽવતુ ।
ત્રિપુરાશ્રીશ્ચ માં નિત્યં ગુહ્યદેશે સદાઽવતુ ॥ ૩૬॥

મૂલાધારે સદા પાતુ દેવી ત્રિપુરમાલિની ।
નાભૌ ત્રિપુરસિદ્ધાઽવ્યાત્ ત્રિપુરા ચ સદા હૃદિ ॥ ૩૭॥

બ્રહ્મરન્ધ્રે સદા પાતુ મહાત્રિપુરસુન્દરી ।
આસાં તુ મન્ત્રબીજાનિ પ્રોક્તસ્થાનેષુ વિન્યસેત્ ॥ ૩૮॥

પાષણ્ડગણમધ્યે તુ બુદ્ધો માં પરિરક્ષતુ ।
બ્રહ્માડવ્યાદ્ બ્રહ્મસંહા[ઘા]તે શિવો માં યોગસિદ્ધયે ॥ ૩૯॥

જ્ઞાને માં ભાસ્કરઃ પાતુ મોક્ષે નારાયણઃ પ્રભુઃ ।
યા શક્તિઃ સર્વભૂતાનાં વિદ્યાઽવિદ્યેતિ ગીયતે ॥ ૪૦॥

સા શક્તિઃ સર્વદા પાતુ સ્ત્રીપુત્રધનસમ્પદિ ।
અણિમા પશ્ચિમે પાતુ લઘિમા ચોત્તરેઽવતુ ॥ ૪૧॥

પૂર્વતઃ પાતુ મહિમા ઈશિત્વા દક્ષિણેઽવતુ ।
વશિત્વા વાયુનિલયે ઈશે પ્રાકામ્યસિદ્ધિદા ॥ ૪૨॥

ભુક્તિસિદ્ધિસ્તથાગ્નેયે પાત્વિચ્છાસિદ્ધી રાક્ષસે ।
અધઃ પાતુ પ્રાપ્તિસિદ્ધિર્મોક્ષ સિદ્ધિસ્તથોર્ધ્વકે ॥ ૪૩॥

બ્રહ્માણી સન્ધ્યયોઃ પાતુ માહેશ્વરી દિવાઽવતુ ।
મધ્યાહ્ને પાતુ કૌમારી રાત્રૌ ચ શત્રુવલ્લભા ॥ ૪૪॥

બ્રાહ્મે મુહૂર્ત્તકે પાતુ વૈષ્ણવી સર્વસિદ્ધિદા ।
નિશીથે પાતુ વારાહી ચામુણ્ડા શત્રુવિગ્રહે ॥ ૪૫॥

મહોત્સાહે મહાલક્ષ્મીઃ પાતુ નિત્ય મહેશ્વરી ।
શીર્ષે સઙ્ક્ષોભણી પાતુ તારિણી હૃદયેઽવતુ ॥ ૪૬॥

આકર્ષણી શિખાયાં તુ કવચે પાતુ વશ્યદા । (આકર્ષિણી)
ઉન્માદિની તથા નેત્રે સર્વગાત્રે મહાઙ્કુશા ॥ ૪૭॥

ત્રિખણ્ડા ભુજયોઃ પાતુ બીજે બીજસ્વરૂપિણી ।
ખેચરી પાદયોઃ પાતુ યોનિમુદ્રા ચ સર્વતઃ ॥ ૪૮॥

સ[કા]માકર્ષણરૂપાઽવ્યાત્ સદાઽઽકર્ષણકર્મણિ ।
બુદ્ધ્યાકર્ષણરૂપાઽવ્યાત્ પરબુદ્ધિવિકર્ષણે ॥ ૪૯॥

અહઙ્કારે સદા પાતુ અહઙ્કારવિકર્ષણી ।
શબ્દાકર્ષણરૂપાઽવ્યાચ્છબ્દાકર્ષણકર્મણિ ॥ ૫૦॥

સ્પર્શાકર્ષણરૂપા માં પાતુ સ્પર્શનકર્મણિ ।

રૂપાકર્ષણરૂપાઽવ્યાત્ પરરૂપવિકર્ષણે ॥ ૫૧॥

રસાકર્ષણરૂપાઽવ્યાદ્ રસે વૈ પરમેશ્વરી । (રસાકર્ષદ)
ગન્ધાકર્ષણરૂપા માં પાતુ ગન્ધે ચ સર્વદા ॥ ૫૨॥

ચિત્તાકર્ષણરૂપા માં પાયાદાકૃષ્ટિકર્મણિ ।
ધૈર્યાકર્ષણરૂપા તુ પાતુ ધૈર્યવિધૌ સદા ॥ ૫૩॥

સ્મૃત્યાઽઽકર્ષણરૂપાઽવ્યાજ્જ્ઞાનાકર્ષણકર્મણિ ।
નામાકર્ષણરૂપાઽવ્યાન્નામવ્યાહરણે સદા ॥ ૫૪॥

બીજાકર્ષણરૂપા માં સર્વબીજપ્રરોપણે ।
પરજીવાકર્ષણે પાતુ આત્માકર્ષણરૂપિણી ॥ ૫૫॥

અમૃતાકર્ષણી પાતુ અમૃતીકરણી સદા ।
શરીરાકર્ષણી પાતુ સદા શરીરરક્ષણે ॥ ૫૬॥

અનઙ્ગકુસુમા પાતુ પુરતઃ સર્વકર્મણિ ।
અનઙ્ગમેખલા પાતુ પૃષ્ઠતઃ પરમેશ્વરી ॥ ૫૭॥

અનઙ્ગમદના પાતુ વામતો મે મહેશ્વરી ।
દક્ષિણે સર્વદા પાતુ અનઙ્ગમદનાતુરા ॥ ૫૮॥

નિત્યં ચાઽનઙ્ગરેખાઽવ્યાદૂર્દ્ધ્વં(?) મમ સદા પ્રિયે ।
અનઙ્ગવેગિની પાતુ અધો પરમેશ્વરી ॥ ૫૯॥

તથાઽનઙ્ગાઙ્કુશા નિત્યં પાતુ માં દિક્ષુ સર્વદા ।
અનઙ્ગમાલિની પાતુ વિદિક્ષુ મમ સર્વદા ॥ ૬૦॥

સર્વસઙ્ક્ષોભણી ચોર્ધ્વે પાતુ માં જગદીશ્વરી ।
સર્વવિદ્રાવિણી ચાધો દિક્ષુ સર્વવિકર્ષિણી ॥ ૬૧॥

સર્વાહ્લાદકરી શક્તિર્વિદિક્ષુ પરિરક્ષતુ ।
સર્વસમ્મોહિની પાતુ સમન્તાત્ પરમેશ્વરી ॥ ૬૨॥

અન્તર્બહિશ્ચ માં પાતુ સર્વસ્તમ્ભનકર્મણિ ।
તથૈવ પાતુ માં નિત્યમાકાશે સર્વજૃમ્ભણી ॥ ૬૩॥

પાતાલે ચૈવ માં પાતુ સર્વવશ્યકરી તથા ।
દેવલોકે સદા પાતુ સર્વરઞ્જનકારિણી ॥ ૬૪॥

સર્વોન્માદનશક્તિર્માં ભૂતલે પરિરક્ષતુ ।
સર્વાર્થસાધની શક્તિઃ પાયાદ્ ભૂતગણાલયે ॥ ૬૫॥

સિધ્દાનામાલયે પાતુ સર્વસમ્પત્તિપૂરણી ।
રાક્ષસાનાં ચ યક્ષાણાં સર્વમન્ત્રમયી ગૃહે ॥ ૬૬॥

અસુરાણાં નિવાસે તુ સર્વદ્વન્દ્વક્ષયઙ્કરી ।
સર્વસિદ્ધિપ્રદા દેવી પાતુ રાજગૃહે સદા ॥ ૬૭॥

સર્વસમ્પત્પ્રદા પાતુ સ્વગૃહે સર્વસમ્પદિ ।
સર્વપ્રિયઙ્કરી પાતુ સર્વલોકેષુ સર્વદા ॥ ૬૮॥

સર્વમઙ્ગલકાર્યેઽવ્યાત્ સર્વમઙ્ગલકારિણી ।
સર્વકામપ્રદા દેવિ ! સર્વકાર્યેષુ સર્વદા ॥ ૬૯॥

ઐશ્વર્યે સર્વદા પાતુ સર્વૈશ્વર્યપ્રદાયિની ।
સર્વમૃત્યુપ્રશમની પાયાન્નિત્યં યમાલયે ॥ ૭૦॥

સર્વારમ્ભે સદા પાતુ સર્વવિઘ્નવિનાશિની ।
દેહસૌન્દર્યકાલે તુ પાતુ સર્વાઙ્ગસુન્દરી ॥ ૭૧॥

સર્વસૌભાગ્યકાલે તુ સર્વસૌભાગ્યદાયિની ।
સર્વજ્ઞા ચ ગૃહે પાતુ સર્વશક્તિમયી રણે ॥ ૭૨॥

સર્વૈશ્વર્યપ્રદા માર્ગે સર્વજ્ઞાનમયી જલે ।
સર્વવ્યાધિષુ સર્વત્ર સર્વવ્યાધિવિનાશિની ॥ ૭૩॥

પર્વતે પાતુ પ્રબલા સર્વાધારસ્વરૂપિણી ।
સર્વપાપહરા પાતુ સર્વકર્મસુ સર્વદા ॥ ૭૪॥

સર્વાનન્દકરી દેવી નાનાસુકૃતગોચરે ।
સર્વવૈરિભયે પાતુ સર્વરક્ષાસ્વરૂપિણી ॥ ૭૫॥

સર્વસઙ્કલ્પકાર્યેષુ સર્વેપ્સિતફલપ્રદા ।
વશિની ’ વશ્યકાર્યેષુ કામેશી સ્તમ્ભનેઽવતુ ॥ ૭૬॥

મોહને મોહિની પાતુ વિમલોચ્ચાટનેઽવતુ ।
અરુણા પાતુ માં વાદે જયિની જલ્પકર્મણિ ॥ ૭૭॥

સર્વેશ્વરી કામ્યકાર્યે કૌલિની ભેદકર્મણિ ।
જૃમ્ભણે સર્વદા પાન્તુ શરાઃ પઞ્ચ મહેશ્વરિ ॥ ૭૮॥

ધનુર્મોહવિધૌ પાતુ પાશસ્તુ પશ્યકર્મણિ ।
મહાતેજોમયઃ પાતુ સ્તમ્ભને માં તથાऽઽઙ્કુશઃ ॥ ૭૯॥

સર્વજ્ઞા હૃદયે પાતુ નિત્યકૃત્યા ચ શીર્ષકે ।
અનાદિબોધિકા પાતુ નિત્યં શિખાપ્રદેશકે ॥ ૮૦॥

કવચે માં સ્વતન્ત્રાऽવ્યાન્નેત્રે નિત્યમલુપ્તિકા ।
અચિન્ત્યશક્તિરસ્ત્રેષુ પાયાત્ પરમસિદ્ધિદા ॥ ૮૧॥

કામેશ્વરી રતૌ પાતુ યુદ્ધે વજ્રેશ્વરી તથા ।
નિત્યં પાતુ મહેશાનિ શ્રીકામે ભગમાલિની ॥ ૮૨॥

રસે રૂપે ચ ગન્ધે ચ શબ્દે સ્પર્શે ચ પાતુ મામ્ ।
સર્વાનન્દમયી દેવી મહાત્રિપુરસુન્દરી ॥ ૮૩॥

ઈશાને વટુકઃ પાતુ આગ્નેય્યાં યોગિનીગણઃ ।
ત્વગસૃઙ્માસમેદોऽસ્થિમજ્જાશુક્રાણિ પાન્તુ નઃ ॥ ૮૪॥

ક્ષેત્રેશો નૈરૃતે(?) પાતુ ગણેશો વાયુમન્દિરે ।
માતઙ્ગવનિતા પાતુ શેષિકા કુલસુન્દરી ॥ ૮૫॥

શક્તિર્માં સર્વદા પાતુ મૂલાધારનિવાસિની ।
ઇતીદં કવચં દેવિ ! ત્રિષુ લોકેષુ દુર્લભમ્ ॥ ૮૬॥

યન્નોક્તં ડામરે તન્ત્રે યન્નોક્તં રુદ્રયામલે ।
સર્વતન્ત્રેષુ યન્નોક્તં ગન્ધર્વે પ્રકટીકૃતમ્ ॥ ૮૭॥

તવ પ્રીત્યા મહાદેવિ ! ગોપનીયં પ્રયત્નતઃ ।
તવ નામ્નિ સ્મૃતે દેવિ ! સર્વયજ્ઞફલં લભેત્ ॥ ૮૮॥

સર્વત્રૈવ જયપ્રાપ્તિર્વાઞ્છા સર્વત્ર સિધ્યતિ ।
નામ્નઃ શતગુણં સ્તોત્રં વ્યાખ્યાનં ચાપિ તચ્છ્રુતમ્ ॥ ૮૯॥

તસ્માચ્છતગુણં ધ્યાનં ધ્યાનાચ્છતગુણો મનુઃ ।
મન્ત્રાચ્છતગુણં દેવિ ! કવચં તે મયોદિતમ્ ॥ ૯૦॥

યસ્મૈ કસ્મૈ ન દાતવ્યં સુગોપ્યમતિદુર્લભમ્ ।
ન દેયં પરશિષ્યાય કૃપણાય સુરેશ્વરિ ॥ ૯૧॥

શિષ્યાય ભક્તિહીનાય ચુમ્બકાય તથૈવ ચ ।

ગુરુભક્તિવિહીનાય પરહિંસારતાય ચ ॥ ૯૨॥

નિન્દકાય કુશીલાય દામ્ભિકાય મહેશ્વરિ ।
અભક્તેભ્યોઽપિ પુત્રેભ્યો દત્વા મૃત્યુમવાપ્નુયાત્ ॥ ૯૩॥

યો દદાતિ નિષિદ્ધેભ્યઃ કવચં મન્મુખાચ્ચ્યુતમ્ ।
તસ્ય નશ્યન્તિ દેવેશિ ! વિદ્યાઽઽયુઃ કીર્તિસઞ્ચયાઃ ॥ ૯૪॥

તં હિંસન્તિ ચ યોગિન્યો મદીયશાસનાત્ પ્રિયે ।
પરે નરકમાપ્નોતિ જન્મકોટિશતાનિ ચ ॥ ૯૫॥

સર્વલક્ષણયુક્તાય મન્ત્રયન્ત્રરતાય ચ ।
શિષ્યાય શાન્તચિત્તાય ગુરુભક્તિરતાય ચ ॥ ૯૬॥

ઉદકે લવણં લીનં યથા ભવતિ પાર્વતિ ।
મનો ભવતિ વૈ લીનં પાદયોઃ શ્રીગુરોઃ પ્રિયે ॥ ૯૭॥

દેયં મહદ્ ગુહ્યં કૃપયા ચાતિદુર્લભમ્ ।
ગુરોઃ પાદપ્રસાદેન શ્રીવિદ્યા યદિ લભ્યતે ॥ ૯૮॥

તથૈવ કવચં દેવિ ! ત્રિષુ લોકેષુ દુર્લભમ્ ।
સ ચ દેવો હરઃ સાક્ષાત્ તત્પત્ની પરમેશ્વરી ॥ ૯૯॥

પ્રમાદાદપિ દેવેશિ ! શ્રીગુરોર્નામ નાદદેત્ ।
યસ્ય ભક્તિર્ગુરૌ નિત્યં વર્તતે દેવવત્ પ્રિયે ॥ ૧૦૦॥

તસ્ય મન્ત્રસ્ય યન્ત્રસ્ય સિદ્ધિર્ભવતિ નાન્યથા ।
કવચસ્ય તથા સિદ્ધિર્ગુટિકાયાશ્ચ સુન્દરિ ॥ ૧૦૧॥

ઇદં કવચમજ્ઞાત્વા યો જપેત્ સુન્દરી પરામ્ ।
નવલક્ષં પ્રજપ્ત્વાપિ તસ્ય વિદ્યા ન સિદ્ધ્યતિ ॥ ૧૦૨॥

શુચિઃ સમાહિતો ભૂત્વા ભક્તિશ્રદ્ધાસમન્વિતઃ ।
સર્વભૂતાલયે સુપ્તે નિશાયામર્દ્ધરાત્રકે ॥ ૧૦૩॥

હેતુયુક્તો મહેશાનિ! નિર્જને પશુવર્જિતે ।
રક્તાસનોપવિષ્ટસ્તુ રક્તાભરણભૂષિતઃ ॥ ૧૦૪॥

તામ્બૂલપૂરિતમુખો ધૂપામોદસુગન્ધિતઃ ।
સંસ્થાપ્ય વામભાગે તુ શક્તિં સ્વામિપરાયણામ્ ॥ ૧૦૫॥

રક્તવસ્ત્રપરીધાનાં શિવમન્ત્રધરાં શુભામ્ ।
યા શક્તિઃ સા મહાદેવી હરરૂપસ્તુ સાધકઃ ॥ ૧૦૬॥

અન્યોન્યચિન્તનાદ્ દેવિ! દેવત્વમુપજાયતે ।
શક્તિયુક્તો યજેદ્ દેવીં શ્રીચક્રે લક્ષણાન્વિતે ॥ ૧૦૭॥

પુષ્પાઞ્જલિત્રયં દેવ્યૈ મૂલમન્ત્રેણ દાપયેત્ ।
ભોગૈશ્ચ મધુપર્કાદ્યૈસ્તામ્બૂલાદ્યૈઃ સુવાસિતૈઃ ॥ ૧૦૮॥

પૂજયિત્વા મહાદેવીં પૂજાકોટિફલં લભેત્ ।
પૂર્વોક્તન્યાસમેવાસ્મિન્ સમયે ચ પ્રવિન્યસેત્ ॥ ૧૦૯॥

આત્માનં પરમં ધ્યાયેદ્ દિવ્યસ્ત્રીભિરલઙ્કૃતમ્ ।
દિવ્યં મૂર્ધ્નિ મહચ્છત્રં સહસ્રદલનિર્મિતમ્ ॥ ૧૧૦॥

સુધાવર્ષિમુખામ્ભોજં સસ્મિતં દિવ્યવર્ચસમ્! ।
પરમાનન્દસન્દોહમુદિતં પરમાવ્યયમ્ ॥ ૧૧૧॥

દિવ્યાલઙ્કારવસ્ત્રાઢ્યં દિવ્યમાલ્યાનુલેપિતમ્ ।
દિવ્યાસનસમાસીનં દિવ્યભોગવિભોગિનમ્ ॥ ૧૧૨॥

સર્વગં સર્વભૂતેશં સૃષ્ટિસ્થિત્યન્તકારિણમ્ ।
નિર્લેપં નિર્મલં શાન્તં સર્વવ્યાપિનમીશ્વરમ્ ॥ ૧૧૩॥

તતો દેવી હૃદમ્ભોજે ધ્યાયેત્ તદ્ગતમાનસઃ ।
જપાકુસુમસઙ્કાશાં બાલાર્કકિરણારુણામ્ ॥ ૧૧૪॥

રક્તપદ્મસમાસીનાં રક્તાભરણભૂષિતામ્ ।
રક્તવસ્ત્રપરીધાનાં પૂર્ણચન્દ્રનિભાનનામ્ ॥ ૧૧૫॥

સૈવાહમિત્યભેદેન દ્વૈતહીનં વિચિન્તયેત્ ।
અદ્વૈતાનન્દભાવેન સાધકઃ પરમાત્મનઃ ॥ ૧૧૬॥

છાયયા શોણયા વ્યાપ્તં જગદેતચ્ચરાચરમ્ ।
ભાવનાવશસમ્પન્નો ભાવયેદ્ ભાવતઃ પરમ્ ॥ ૧૧૭॥

એવં ચિન્તાપરસ્યાઽઽશુ સિદ્ધયોઽષ્ટૌ ભવન્તિ હિ ।
સમ્પ્રાપ્ય વિપુલાન્ ભોગાન્ રાજ્યાસ્પદઞ્ચ ભૂતલે ॥ ૧૧૮॥

ઐન્દ્ર પદમવાપ્યાથ ' વિહરેન્નન્દને વને ।
ઉર્વશીપ્રમુખાભિશ્ચ સ્વેચ્છયા દિવ્યભોગવાન્ ॥ ૧૧૯॥

તદાપ્નોતિ પરં સ્થાનં દુરાપં ત્રિદશૈરપિ ।
તતસ્તુ કવચં દિવ્યં પઠેદેકમનાઃ પ્રિયે ॥ ૧૨
તસ્ય સર્વાર્થસિદ્ધિઃ સ્યાન્નાત્ર કાર્યા વિચારણા ।
ઇદં રહસ્યં પરમં પરં સ્વસ્ત્યયનં મહત્ ॥ ૧૨ ॥

સર્વેષામેવ હિંસ્રાણાં ડાકિનીનાં મહેશ્વરિ ।
નિશાચરગણાનાઞ્ચ વારણં નાશનં તથા ॥ ૧૨૨ ॥

આયુર્બલપ્રદં નિત્યં તુષ્ટિપુષ્ટિશુભાવહમ્ ।
નારીણાં મૃતવત્સાનાં ગુણવત્સુતદાયકમ્ ॥ ૧૨૩ ॥

સૂત્યા સૂતિગૃહસ્યાપિ બાલગ્રહનિવારણમ્ ।
વિષદસ્યુગ્રહાણાઞ્ચ સદા શાન્તિવિવર્દ્ધનમ્ ॥ ૧૨૪ ॥

વિષશસ્ત્રાઽગ્નિરુદ્રાણાં વારણં જયદં યુધિ ।
જલે સ્થલે તથાઽઽકાશે સર્વોત્પાતેષુ સર્વદા ॥ ૧૨૫ ॥

ત્રૈલોક્યવાસિનામેવ સર્વમઙ્ગલદાયકમ્ ।
સકૃદ્ યસ્તુ પઠેદ્ દેવિ ! કવચં દેવદુર્લભમ્ ॥ ૧૨૬ ॥

હયમેધફલં તસ્ય ભવત્યેવ સંશયઃ ।
નિત્યં યસ્તુ પઠેદ્ દેવિ શૃણુયાદ્ વા સમાહિતઃ ॥ ૧૨૭ ॥

સ સર્વાન્ લભતે કામાન્ પરે દેવીપુરં વ્રજેત્ ।
સઙ્ગ્રામે ચ જયેચ્છત્રૂન્ માતઙ્ગાનિવ કેશરી ॥ ૧૨૮ ॥

દહેત્ તૃણં યથા વહ્નિસ્તથા શત્રૂન્ જયેત્ સદા ।
નાસ્ત્રાણિ તસ્ય શસ્ત્રાણિ શરીરે પ્રભવન્તિ ચ ॥ ૧૨૯ ॥

તદ્ગાત્રં પ્રાપ્ય શસ્ત્રાણિ ’ બ્રહ્માસ્ત્રાદીનિ યાનિ ચ ।
માલ્યાનિ કુસુમાનીવ સુખદાનિ ભવન્તિ હિ ॥ ૧૩૦ ॥

પરાઃ પરાઙ્મુખા યાન્તિ વિના યુદ્ધેન પાર્વતિ ।
વ્યાધિસ્તસ્ય કદાચિત્ તુ દુઃખં નાસ્તિ કદાચન ॥ ૧૩૧ ॥

ગતિસ્તસ્યૈવ સર્વત્ર વાયોસ્તુલ્યા સદા ભવેત્ ।
દીર્ઘાયુઃ કામભોગીશો ધનધાન્યસમૃદ્ધિમાન્ ॥ ૧૩૨ ॥

જિતવ્યાધી રૂપવાન્ સ્યાદ્ ગુણવાનભિજાયતે ।

ચાતુર્વર્ગ્યં કરે તસ્ય ભવત્યેવ ન સંશયઃ ॥ ૧૩૩॥

અન્યસ્ય વલ્લભઃ સો વૈ પુત્રદારકુલાન્વિતઃ ।
ઇહલોકે સુખં ભુક્ત્વા પરે મુક્તો ભવિષ્યતિ ॥ ૧૩૪॥

ન તસ્ય દુર્ગતિર્દેવિ ! કદાચિદપિ જાયતે ।
દુર્ગ્રહાઃ સુગ્રહા યાન્તિ વશં ગચ્છન્તિ માનવાઃ ॥ ૧૩૫॥

ન તસ્ય વિઘ્નો ભવતિ ન શોકો ભુવિ જાયતે ।
વેતાલાશ્ચ પિશાચાશ્ચ રાક્ષસાશ્ચ ભયાનકાઃ ॥ ૧૩૬॥

તે સર્વે વિલયં યાન્તિ કવચસ્યાસ્ય કીર્તનાત્ ।
તસ્યૈવ શત્રવો દેવિ ! ચિન્તામાત્રપ્રયોગતઃ ॥ ૧૩૭॥

વિનશ્યન્તિ ન સન્દેહો યોગિન્યો ભક્ષયન્તિ તાન્ ।
શાન્તિકાદીનિ કર્માણિ મારણોચ્ચાટનાનિ ચ ॥ ૧૩૮॥

વચોમાત્રેણ દેવેશિ ! તસ્ય સિધ્યન્તિ ભૂતલે ।
ન પાપૈર્લિપ્યતે દેવિ ! મહોગ્રૈસ્તુ સુદારુણૈઃ ॥ ૧૩૯॥

ન કાલસ્ય વશં ગચ્છેન્ન જરા ન ચ દુઃખિતા ।
તત્ર દેશે ન દુર્ભિક્ષં ન ચ મારી પ્રવર્તતે ॥ ૧૪૦॥

ન રોગાસ્તત્ર જાયન્તે નોત્પાતાઃ પ્રભવન્તિ ચ ।
વિવિધાશ્ચૈવ યોગિન્યસ્તસ્ય સાધકસન્નિધૌ ॥ ૧૪૧॥

શાન્તિં ચૈવ પ્રયચ્છન્તિ રક્ષન્તિ પુત્રવત્ સદા ।
સર્વદા ચ સુખપ્રાપ્તિઃ સર્વતીર્થફલં લભેત્ ॥ ૧૪૨॥

નાનેન સદૃશઃ કશ્ચિત્ સાધકો ભુવિ જાયતે ।
સુરાસુરમનુષ્યાણાં તત્ત્વરૂપઃ સુખાવહઃ ॥ ૧૪૩॥

યેન વિજ્ઞાતમાત્રેણ સ્મૃતેનૈવ ચ સુન્દરિ ।
અક્ષયાન્ લભતે કામાન્ મુક્તિસ્થાનં ચ ગચ્છતિ ॥ ૧૪૪॥

સર્વલક્ષણહીનોઽપિ સ્મરણાત્ ' કલુષાપહઃ ।
અહો કવચમાહાત્મ્ય પઠમાનસ્ય નિત્યશઃ ॥ ૧૪૫॥

વિનાપિ યોગચર્યેણ યોગિનાં સમતાં વ્રજેત્ ।
ભૂર્જત્વચિ સમાલિખ્ય ચક્રં તત્ત્વવિનિર્મિતમ્ ॥ ૧૪૬॥

મધ્યે ત્રિકોણં સંલિખ્ય સાધ્યસાધકયોર્લિપિમ્ ।
તદૂર્ધ્વે મૂલમન્ત્રઞ્ચ માતૃકાર્ણેન વેષ્ટયેત્ ॥ ૧૪૭॥

અગુરુદ્રવમિશ્રેણ ચન્દનેન સુગન્ધિના ।
એતદ્ યન્ત્રમ્ મહાદેવિ ! સુરાસુરસુદુર્લભમ્ ॥ ૧૪૮॥

રોચનાકુઙ્કુમેનૈવ તદ્બાહ્યે કવચં લિખેત્ ।
શ્વેતસૂત્રેણ સંવેષ્ટ્ય લાક્ષયા પરિવેષ્ટયેત્ ॥ ૧૪૯॥

પઞ્ચામૃતૈઃ પઞ્ચગવ્યૈઃ સ્નાપયિત્વા શુભેઽહનિ ।
સમ્પૂજ્ય દેવીરૂપાં તાં ગુટિકાં સર્વકામદામ્ ॥ ૧૫૦॥

પ્રાણપ્રતિષ્ઠામન્ત્રેણ પ્રાણાંસ્તત્ર નિવેશયેત્ ।
ચારુણા શાક્તકુમ્ભેન ભૂષિતાં યોનિમુદ્રયા ॥ ૧૫૧॥

અન્તર્યોનિં તતો ધ્યાત્વા તત્ર સંસ્થાપયેદ્ બુધઃ ।
એષા તુ ગુટિકા દેવિ ! કણ્ઠલગ્ના ધનપ્રદા ॥ ૧૫૨॥

શીર્ષે વશ્યકરી દેવિ ! કટ્યાં સ્તમ્ભનકારિણી ।
બધ્વા વામભુજે ચૈવ વૈરિપક્ષવિનાશિની ॥ ૧૫૩॥

જઠરે રોગશમની પુત્રદા હૃદિસંસ્થિતા ।
વિદ્યાકરી લલાટસ્થા શિખાયાં તુ યશઃપ્રદા ॥ ૧૫૪॥

દક્ષિણે બાહુમૂલે વૈ યદિ તિષ્ઠતિ સર્વદા ।
તદા સર્વાર્થસિદ્ધિઃ સ્યાદ્ યદ્યન્મનસિ વર્તતે ॥ ૧૫૫॥

સત્યં સત્યં પુનઃ સત્યં સત્યં સત્યં પુનઃ પુનઃ ।
ન શક્નોમિ પ્રભાવં હિ કથિતું કવચસ્ય વૈ ॥ ૧૫૬॥

એતત્તુ કવચેનૈવ પઠનં સાધનં પ્રિયે ।
કથિતં મે તવ સ્નેહાદ્ ગોપનીય સદા ભુવિ ॥ ૧૫૭॥

॥ ઇતિ શ્રીરાજરાજેશ્વરીકવચં સમ્પૂર્ણમ્ ।
॥ ઇતિ શ્રીગન્ધર્વતન્ત્રે મહાત્રિપુરસુન્દરીત્રૈલોક્યમોહનાખ્યઃ
ચતુર્થઃ પટલઃ ॥ ૪॥

Proofread by Megha Jogithaya

*Shri Rajarajeshvari Kavacham*

pdf was typeset on December 17, 2022

Please send corrections to *sanskrit@cheerful.com*